# 2024

## SANSKRIT — HONOURS

**Paper : CC-11**

**(Vedic Literature)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**विशेषोल्लेखं विना सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।**

**Section – A**

**Unit - I**

**(Marks : 30)**

1. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) अग्ने यं यज्ञमध्वरं
विश्वतः परिभूरसि।
स इद्देवेषु गच्छति॥

(b) जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरतः क्व स्वित्।
ऋणावा बिभ्यद्धनमिच्छमानो–
ऽन्येषामस्तमुप नक्तमेति॥

(c) हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम॥

(d) अहं राष्ट्री संगमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम्॥

2. निम्नोद्धृतेषु यथाभिमतं कस्य**चिदेकस्य** मन्त्रस्य व्याख्या कार्या। 8×1

(a) स नः पितेव सूनवे
ऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये॥

(b) द्वेष्टि श्वश्रूरप जाया रुणद्धि
न नाथितो विन्दते मर्डितारम्।
अश्वस्येव जरतो वस्न्यस्य
नाहं विन्दामि कितवस्य भोगम्॥

(c) य आत्मदा बलदा यस्य विश्व
उपासते प्रशिषं यस्य देवाः।
यस्य छायामृतं यस्य मृत्युः
कस्मै देवाय हविषा विधेम॥

***अथवा,***

अधोलिखितेषु सन्दर्भेषु यथाभिलाषम् ***एकतमस्य*** व्याख्या कार्या। 8×1

(a) तत्र 'अग्निमीळे' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

(b) तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः।

(c) वरुणप्रघासेषु कायस्य हविषो 'हिरण्यगर्भ' इत्येषा याज्या।

3. (a) "अग्निर्होता कविक्रतुः"– मन्त्रांशोऽयम् ऋग्वेदस्य कस्मिन् मण्डले समाम्नातः? कोऽत्र ऋषिः, किं वा छन्दः? कविक्रतुशब्दस्य कोऽर्थः? मन्त्रेऽस्मिन् स्तुतायाः देवतायाः स्वरूपवैशिष्ट्यं पर्यालोच्यताम्। 1+1+1+2+7

***अथवा,***

(b) देवीसूक्तस्य नामान्तरं किम्? तत् च सूक्तम् ऋग्वेदस्य कस्मिन् मण्डले आम्नातम्? कोऽत्र ऋषिः, का देवता, किं वा छन्दः? सूक्तस्यास्य दार्शनिकं तात्पर्यं निरूप्यताम्। 1+1+1+1+1+7

## Unit - III

### (Marks : 10)

4. (a) अधोलिखितयोः ***मन्त्रयोः*** वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 5×2

(i) सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या॥

(ii) समानी प्रपा सह वोऽन्नभागः
समानं योक्त्रें सह वों युनज्मि।
सम्यञ्चोऽग्निं संपर्यतारा
नाभिमिवाभितः।।

*अथवा,*

(b) अधोलिखितयोः यथाभिमतम् ***एकतरस्य*** मन्त्रस्य सप्रसङ्गं व्याख्या कार्या। 10×1

(i) असंबाधं मध्यतो मानवानां
यस्यां उद्वतः प्रवतः समं बहु।
नानावीर्या ओषधीर्या बिभर्ति
पृथिवी नः प्रथतां राध्यतां नः।।

(ii) यस्याश्चतस्रः प्रदिशः पृथिव्या
यस्यामन्नं कृष्टयः संबभूवुः।
या बिभर्ति बहुधा प्राणदेजत्
सा नो भूमिर्गोष्वप्यन्नें दधातु।।

*अथवा,*

(c) "भगं वर्चः पृथिवी नों दधातु"— मन्त्रांशोऽयं कुत्र समाम्नायते? कोऽत्र ऋषिः, का च देवता? भवदीयपाठ्यांशमवलम्ब्य सूक्तस्यास्य उपजीव्यं गुरुत्वं च पर्यालोच्येताम्। 1+2+5+2

## Section – C

### Unit - I

**(Marks : 10)**

5. (a) अधोलिखितयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(i) कलिः शयानो भवति संजिहानस्तु द्वापरः।
उत्तिष्ठस्त्रेता भवति कृतं संपद्यते चरंश्चरैवेति।।

(ii) तस्य ह त्रयः पुत्राः आसुः, शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति। तं होवाच— ऋषेऽहं ते शतं ददाम्यहमेषामेकेनात्मानं निष्क्रीणा इति। स ज्येष्ठं पुत्रं निगृह्णान उवाच, नन्विममिति; नो एवेममिति कनिष्ठं माता; तौ ह मध्यमे संपदयांचक्रतुः शुनःशेपे, तस्य ह शतं दत्त्वा स तमादाय सोऽरण्याद् ग्राममेयाय।

*अथवा,*

(b) अधोलिखितयोः यथाभिलाषम् ***एकतरस्य*** सप्रसङ्गं व्याख्या कार्या। 10×1

(i) आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी।

(ii) औघ इमाः सर्व्वाः प्रजा निर्व्वोढा ततस्त्वा पारयितास्मीति।

*अथवा,*

(c) मनुमत्स्यकथा कस्मिन् ब्राह्मणे, कस्मिन् वेदे च समुपलभ्यते? भवदीयपाठ्यांशमवलम्ब्य आख्यानमिदमुपस्थाप्यताम्। 10

**Unit - II**

**(Marks : 15)**

6. निम्नोद्धृतेषु ***एकतमस्य*** सप्रसङ्गं व्याख्या कार्या। 7×1

(a) अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः॥

(b) मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

(c) अमृतत्वस्य तु नाशास्ति वित्तेन।

7. (a) बृहदारण्यकोपनिषदः एवंविधे नामकरणे किं कारणम्? अस्याः उपनिषदः मुख्यम् उपजीव्यं सम्यगालोच्यताम्। 2+6

*अथवा,*

(b) बृहदारण्यकोपनिषद् कस्मिन् वेदे समाम्नाता? अस्याः उपनिषदः कस्मिन्नध्याये जीवात्मनः उत्क्रान्ति-रुपवर्णिता? बृहदारण्यकोपनिषदमवलम्ब्य जीवात्मनः उत्क्रान्तिः सविशदम् आलोच्यताम्। 1+1+6

---